# शिक्षायां जीवनसंस्कृत्योः समन्वयः

**Dr.Chandrakant**

HoD, Department of Education,

R.G.Campus, Sringeri.

लोके जनाः शिक्षणं प्राप्य जीवमानाः शिक्षणमप्राप्य जीवमानाश्चावलोक्यन्ते । शिक्षणं विनापि प्राचीनकाले जनाः संस्कृतिमन्तः ससन्तोषं सफलं जीवनमयासिषुः । परमिदानीन्तकाले शिक्षणं प्राप्यापि जनाः सुखं सन्तोषञ्चालभमानाः वर्तन्ते । अतः शिक्षणापेक्षया संस्कृतिरेव बलीयसीति ज्ञायते । तथा चेत् का नाम शिक्षेति संशीतिस्समुदेति । तदुच्यते – स्वस्थे शरीरे स्वस्थमनसः स्थापनमेव शिक्षा । 1 ( Creation of sound mind in a sound body ) शारीरिक मानसिक स्वास्थ्यविकसनप्रक्रियैव शिक्षेत्यर्थः समायाति । मानवे पूर्वमेव निहितायाः पूर्णताया अभिव्यञ्जनमेव शिक्षेति । 2 ( Education is manifestation of perfection already present in man. )

अयमभिप्रायः बृहदारण्यकोपनिषद्वाक्यमेव पुष्टीकरोति 3 यथा पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते । पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यत इति । सच्चिदानन्दघनः परब्रह्मा सर्वथा पूर्णः वर्तते । इदं जगदपि पूर्णं वर्तते । तस्मात् पूर्णादेवोत्पन्नोऽयं मानवोऽपि पूर्णोऽस्ति । परं पूर्णतायाः समभिव्यञ्जनं मानवेषु नावलोक्यते साम्प्रतम् । शिक्षा पूर्णतायाः प्रदात्री स्यादित्यभिप्रायः प्रस्फुटति । यतो हि परब्रह्मरूपः परमात्मा मानवात्मनि विद्यते, तस्य परमात्मनोऽभिव्यक्तिर्यदा जायते तदा मानवः परिपूर्णः जायते । अतः तादृशी शिक्षा दातव्या वर्तते ।

एवं तर्हि का नाम संस्कृतिरिति विचार्यते चेत् संस्कृतिर्नाम संस्कारजन्येति ज्ञायते ।

दिलीप सूनुर्मणिराकरोद्भवः प्रयुक्तसंस्कार इवाधिकं बभौ । 4
संस्कारवत्येव गिरा मनीषी तया स पूतश्च विभूषितश्च ॥ 5

फलानुमेयाः प्रारम्भाः संस्काराः प्राक्तना इव 6 – इत्येवं कालिदासः स्वकीयेषु काव्येषु संस्कारपूर्णान् व्यक्तित्वविशेषान् प्रास्तावीत् । अनेन ज्ञानेन यत् संस्कारेण मानवः संस्कृतिपूर्णः जायते । संस्कृतिजनकः संस्कारः कीदृशश्चेत् आचारविचारप्रतिपादको हि सः इति ।

अतः बालकेभ्यः तत्रादौ संस्कारः देय इत्युच्यते प्राचीनैः । तदुक्तमुपनिषदि सत्यं वद धर्मं चर, स्वाध्यायान्माप्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः ।

सत्यान्नप्रमदितव्यम् । धर्मान्नप्रमदितव्यम् । कुशलान्नप्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायान्नप्रमदितव्यम् । देवपितृकार्याभ्यां न प्रमदितव्यमिति । 7

एवमेव गर्भाधानादिषोडशसंस्काराः प्रोक्ताः । एतादृशसंस्काराः संस्कृतिजनकाः वर्तन्ते । संस्काराः यदि बालकेषु सम्यगारोपिताः भवन्ति तर्ह्यवश्यमेव संस्कृतिमन्तः मानवाः जायन्ते । अतः शिक्षणापेक्षया संस्कृतिरेव बलीयसीति वक्तुं शक्यते । ननु केवलं संस्कृत्यैवाधुनिककाले जीवने किञ्चित् साधयितुं शक्यते चेन्न ।

संस्कृततिः शिक्षणस्यालङ्कारो वाऽभूषणं भवति । यदि शिक्षितस्य पुरुषस्य जीवन संस्कृत्या समलङ्कृतं स्यात् तर्हि जीवनेऽवश्यमेव पूर्णातावलोक्यते ।

जीवनसंस्कृत्योः सम्बन्धः दीपतैलयोः सम्बन्ध इवात्यन्तघनीभूतः वर्तते । तथैव परस्परपोष्यपोषकभावयुतोऽपि वर्तते । यथातैलाश्रयेण दीपः परिशुद्धप्रकाशं जनयति तथैव संस्कृतेः प्रभावेण जीवनं स्वशुद्धसिद्धिं सम्पादयति । तैलाश्रयो यदि न मिलति दीपस्य तर्हि का अवस्था भविष्यति सैवावस्था संस्कृतिविहीनजीवनस्य भविष्यति । आचारहीनं न पुनन्ति वेदाः । वेदा अपि सदाचारदिसंस्कृतिहीनं रक्षितुं वा तारयितुं, न शक्नुवन्ति । यथा तैले विद्यमानं सुप्तं तेजः प्रकाशयितु दीपः (अनलः) तथा संस्कृतेः परिधौ जीवः सम्यक् प्रतिष्ठितः स्यात् ।

अस्माकं जीवनरङ्गमञ्चस्य विविधस्तरेषु सुन्दरविजयप्रकल्पिका, ध्येयसाधिका, परिश्रमात्मकशक्तेः सात्विकतेजसश्च प्रकाशयित्री महाशक्तिमती संस्कृतिः विद्यते । जीवने स्थानमानसंसाधिका प्रगतिपथेऽग्रेसर्तुं सामञ्जस्यनियोजयित्री, साधनविधाननिर्मात्री जीवनस्य नानाङ्गानां सुवर्धने मार्गदर्शिका संस्कृतिः समस्ति । वयं मनुष्यरूपेण जनिं प्राप्यापि मनुष्यत्वप्राप्त्यर्थं तदादर्शान् अस्मभ्यं साधयितुं संस्कृतिरावश्यक्येव । जीवने सह एतादृशाः निकटसम्बन्धः संस्कृतेः वर्तते ।

अपि च संस्कृत्या जीवनस्य पूर्णता इत्यंशं स्फुटयितुं संस्मरणीयघटना अवश्यमुद्भावनीया । प्रजारञ्जकस्य दशरथस्य सः कालः 8 । दशरथस्तावत् असामान्यः शब्दवेदिविद्यानिपुणश्चासीत् । स चैकदा मृगान्वेषणार्थमरण्यं जगाम । तदा अरण्यसञ्चाररतौ वृद्धदम्पती जलपिपासया पीडितौ, एकमात्रं स्वपुत्रं श्रवणकुमारं जलानयनार्थं तटागं प्रति प्रेषयामासतुः । जलपूरणसमये घटेन निर्गतं शब्दं श्रुत्वा दशरथः मृगधिया बाणप्रयोगं चकार । अपरक्षणे एव हा हन्त इति शीत्कारः तेनाश्रावि ।

झटिति ध्वनिमनुसृत्याधावत् तदा शराघातेन मरणं भजमानं ऋषिकुमारं दृष्ट्वा राज्ञः हृदयमकम्पत । हे कुमार ! अपराधो जातः । क्षम्यतां । मया किं कर्तव्यमित्यपृच्छत् ?

हे राजन् ! नान्यत्करणीयम् । पिपासापीडितयोः मम पित्रोः कृते जलं नीत्वा ददातु इत्यवोचत् ।

तथास्तु इत्युक्त्वा, राजा घटेन जलमानीय वृद्धौ प्रार्थयत् ।

त्वं कोऽपि? पुत्र ! जलमानीतं किम् ? इति तावपृच्छताम् ।

जलमानीतवान् । परं भवतां पुत्रः नास्मि । अज्ञानेन भवत्पुत्रं मारितवान् । पातकिरहं दशरथराजोऽस्मि । क्षम्यतामित्यवदत् । अत्रैव संस्कृती राजते ।

राष्ट्रप्रभवे वृद्धयोः क्षमायाचनं न रोचते स्म । असामान्यमेतत् । एतादृशमज्ञानकृतं वधं निःशब्दं निगूहितुं दशरथेन शक्यं नासीत् किम् ? तथापि –

परस्मिन् बन्धुवर्गे वा मित्रे द्वेष्ये रिपौ तथा ।
आत्मवद्धर्तितव्यं हि दयैव परिकीर्किता ।। 9

क्षमाभूषणं दोषस्य इत्यचिन्तयत् राजान्तरात्मा । अयमेव जीवने संस्कृतेः साक्षात्कारः ।

अतः कारणात् संस्क्रुतिविहीनजीवनदर्शनापेक्षातः जीवने संस्कृतेः प्रभावः कियानिति ज्ञायते । चण्डमारुतेन पीडितनौका यथा इतस्ततः सम्भ्रमति तथैव संस्कृतिं विना जीवनमपि सुव्यवस्थितव्यवहारराहित्येन नौकासमानावस्थामनुभवति । अस्मासु संस्कृतेर्विकासः न भवति चेत् विना पुष्पं लतायाः का धन्यता ? तदस्माकमपि किल ? अनेन संस्कृतेः ज्ञानं कियदनिवार्यमिति ज्ञायते ।

अपि च व्यक्तेः , समाजस्य, राष्ट्रस्य च प्रगतिः अविनाशिनी, अजेया भवेत् चेत्तत्र संस्कृतेः अक्षयप्रकाशः आवश्यकः । परराष्ट्रस्य दुराक्रमणं विरुध्य स्थातुं संस्कृतिं विना नान्या प्रबला शक्तिरस्ति । समाजः स्वदर्शान् नान्येन साधनेन विधानेन वा साधयति । राष्ट्रं स्वविजयस्यं येन केनापि भौतिकेन शस्त्रादिबलेन न प्राप्नोति । केवलया आत्मशक्तौ सुप्तसंस्कृत्यैव पुरुषः, समाजः, राष्ट्रं वा विजयी भवति । सुजाग्राता आत्मशक्तिः, अर्थात् विकसितसंस्कृतिः शतकोटिशस्त्रास्त्राणि, दर्पदुरभिमानानि च निवार्यं विजयस्य भद्रपीठम् आरोहतीत्यवधेयमस्ति ।

एवं सति का नाम संस्कृतिरिति शङ्का जायत एव । किं संस्कृतिर्नाम जडपदार्थः?

अथवा इन्द्रियातीतज्ञानगम्या किम् ? अल्पा वा ? अनन्ता वा ? इति निरन्तरप्रश्नप्रणाली एव समुदेति । परं संस्कृतिः नैतेष्वन्तर्भवति । तदद्रष्टुं न कुत्रापि गन्तव्यमस्ति । अस्याः जिज्ञासुः अन्तर्मुखी भवेत् । स्थिरात्मशकतु यत्सत्प्रचोदनां जनयति,

यदस्माकं नैतिकजीववायुर्भूत्वा प्रगतिपथे अग्रेसर्तुं सम्पूर्णसामर्थ्यं ददाति, तदेव संस्कृतिनाम्ना व्यपदेशयोग्यं भवति।

संस्कृतिः युगयुगान्तरादनूचानरूपेण समागता जीवनप्रणालिः । इयं न केवलं नृत्यसाहित्यसंगीतेभ्यः अन्वितः मानदण्डः । इयं कस्यापि जनाङ्गस्य वा राष्ट्रस्य नैतिकविकास एव वर्तते।

एवं सरलामपि संस्कृतिं महापण्डिताः स्वव्याख्यानैः गभीरां कृत्वा जीवनं नीरसमजनयन् । इमे संस्कृतिः, संस्कृतिरिति कोलाहलमुद्भाव्य जीवने संस्कृतेः प्रगतिं न्यवारयन् । परदेशीयाः भौतिकसम्पदा सैविध्यं प्रकल्प्याग्रिमाः भान्ति । परमस्माकं सात्त्विकसंस्कृतेः पुरतः ते न मान्यतां प्राप्नुयुः। एकस्मिन् काले प्रबलाः भूत्वा अन्यस्मिन् काले नामावशिष्टा अपि न भवन्ति। तत्र जर्मन् देशः एव निदर्शनम्। अस्माकं देशः कदापि न तथा भविष्यति। तादृशीं दुर्दशां न प्राप्नोति च। यतो हि शतमानद्वयं यावत्पराक्रमणं प्राचलत्। अस्माकं संस्कृतेरुपरि विदेशीनागरिकतारोपिता । शिक्षणविधिरारोपितः । परमात्मगतसांस्कृतिकशक्तिमवरोद्धुं न शक्ताः समभवन्। एकदा सा झटिति जागरितैव। शस्त्रास्त्रैर्बलैः समलङ्कृतमपि वैदेशिकं सत्याहिंसापूर्णैः नैतिकबलैरेव निवार्य स्वस्वातन्त्र्यं प्राप्नोदयं देशः। इदं संस्कृतिप्रभावस्य द्योतकम्। हिन्दू, इस्लां, क्रैस्त, फार्सि इत्यादिधर्मभेदाः संस्कृतेरवताराः। एषामाश्रयः संस्कृतिरेव। परमेषां धर्माणामुगमः ध्येयसिद्ध्युद्देशेनैव जातः। अतः परस्परं विसंवादः नैवकार्यः।

धर्मविषये जनितापचारं निवारयितुमेव शंकर – रामनुज – मध्व – स्वामिविवेकानन्द- अरविन्दरमणप्रभृतयः सम्यक् संस्कृतेः मार्गदर्शनं चक्रुः। महात्मा गान्धी तु धर्मविषये नूतनविचारान् प्रदाय नूतन पाठमपाठयत्।

एवञ्च सकलधर्माणाम्मूलमेकमेव । आचारविचारेषु भेदः दृश्यते चेदपि सर्वेऽपि शान्तिमेवाबोधयन्। वसुधैवकुटुम्बकमिति भावनाम् अन्वभजन्।

अयं निजः परो वेति गणनाम्लघुचेतसाम्।
उदारचरितानां तु वसुधैव कुटुम्बकम्॥ 10

धर्मलक्षणं तावत् एवमुक्तम् –

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।

ह्रीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्॥ 11

एतेषां समेषां जीवनेऽनुष्ठानमेव धर्मानुष्ठानं, नान्यत्। हिन्दुर्भवतु , मुस्लिं वा भवतु, क्रैस्तो वा भवतु स्वकीयधर्मे तत्त्वं किमपि नास्तीति वक्तुं प्रतिपादयितुं च शक्नोति। एकमेव

तत्त्वं समेषाम् । अत: केवलं धर्मविषये कोलाहल: नैव योग्य: । तत्वैकत्वे सति य: कोपि धर्म: भवतु श्रेष्ठ एव।

परं स्वधर्मं त्यक्त्वा धर्मान्तरं प्राप्तुम् अस्माकं भवतु कस्यापि संस्कृति: नानुमनुते अत एव गीतोपदेश:।

श्रेयान् स्वधर्मो विगुण: परधर्मात् स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेय: परधर्मो भयावह: ।। 12

जन्मत: यस्मिन् धर्मे अस्ति तस्मिन्नेव भवितव्यम्। तदेव श्रेय इति। अस्माकं संस्कृते: मूलस्त्रोत: वेद: ।अत: संस्कृते: भण्डार: विशाल: वर्तते।

'चर्मकारेभ्यो नम: , रथकारेभ्यो नम: , तस्करणां पतये नम:' 13 इत्येवं प्रत्येकमपि समाजसेवकं पूज्यभावेन पश्यति अस्माकं संस्कृति: । अस्माकं संस्कृति: जाति – मत - पथ्यादिभेदरहितं सात्त्विकजीवनं प्रीणाति। इदमस्माकं संस्कृते: वैशिष्ट्यम् ।

एवञ्च केवलं विचारप्रचारेण न प्रगति: न च संस्कृतेर्विकास: ।

तत्त्वनिष्ठव्यवहारानुष्ठानेनैव संस्कृति: राजते विकसति च। अस्माकं उत्सवा: सर्वे संस्कृते: संकेता:। यदि सर्वे जीवनेन सह संस्कृतिं मेलयित्वा समरसं सम्पाद्य सुशिक्षिता: सन्त: जीवन्ती तर्हि लोके सर्वत्र शान्ति: ,सुखं , संतोष: ,विकासश्च जायते। जीवनं कस्यापि मानवस्य कृते शाश्वतं नास्ति।

वासांसि जीर्णानि यथा विहाय नवानि गृण्हाति नरोऽपराणि
तथा शरीराणी विहाय जीर्णान्यन्यानि संयाति नवानि देही ।। 14

यथा सर्वे मलिनं वस्त्रं परिवृत्य निर्मलं नूतनं वस्त्रं धरन्ति तद्वत् मानव: एनं देहं परित्यज्य अवश्यमेव गच्छति। यदि पुन: जन्म वर्तते तर्ह्यन्यत् शरीरं प्राप्नोति। परन्तु प्राप्तेऽस्मिन् जन्मनि संस्कृतिमान् भूत्वा जीवनं यापयति चेदवश्यमेव चिरं जीवति।

एवञ्च शिक्षा कीदृशी भवेदित्युक्ते संस्कृतिपूर्णा जीवनसम्बद्धा च भवेत् । तदेव शिक्षाविदामाशय: । यथोक्तं - आधुनिकशिक्षा व्यक्ते: समाजस्य च कल्याणसम्बद्धा वर्तते 15 - ( Mordern education is concerned with the welfare of both the individual and society) शिक्षा बालकस्य मानवस्य च शारीरिक - मानसिक - आध्यात्मिक सर्वोत्तम

अभिव्यक्तिरूपा वर्तते । 16 ( By education I mean an alround drawing out of the best in child and sound body mind and spirit.)

आत्मशक्तिसमलङ्कृता वयं देशशक्तिमभिवर्धयाम चेत् ।
नास्ति नित्यपरकीयपीडनम् नास्ति शाश्वतदरिद्रता किल ।।

**उपयुक्तग्रन्थसूची -**

1 . उच्चतरशिक्षामनोविज्ञान - डा. एस्. पी. गुप्ता & डॉ. अलका गुप्ता ( शारदापुस्तक भवन इलाहाबाद, २०१०)

2. शब्दार्थकौस्तुभः - चक्रवर्ती श्रीनिवासगोपालाचार्य: ( श्री. कौस्तुभ सौदा प्रकाशन , बैंगलूरू,1987)

3. ईशादि नौ उपनिषद्- ( गीताप्रेस, गोरखपुर, सं 2069, 21st पुनर्मुद्रण)

4. शिक्षामनोविज्ञान - पी. डी. पाठक ( विनोदपुस्तक मन्दिर आग्रा)

5. श्रीमद्भवद्गीता - प्रस्तोता महात्मा मौनिजी श्री गुरुकृपा आश्रम , आंनन्द, गुजरात। सं- 2060)

6. युगयात्री भारतीयसंस्कृति- (हरिदास भट्टाचार्य:) प्रसाराङ्ग मौसूतु विश्विविद्यालय , 1975)

7. Indian isdom - (Monmier Williams) Rupa co Daryaganj, New Delhi, 2003

8. शिक्षा के सिद्धान्त - पाठक एवं त्यागी, ( विनोद पुस्तकमन्दिर, आगरा)

9. श्री रामायण पात्र प्रापश्च - डॉ. के. एस्. नारायाचार्य: , साहित्य प्रकाशन, हुबल्ली, 2010

End Notes –

1. अरिस्टातल्
2. स्वामीविवेकानन्दः
3. बृह. 3.5-1-1
4. रघुवंशम् 3-18
5. कुमारसम्भवम् 1-28
6. रघुवंशम् 1-20
7. तै. उप. 1-11
8. रामायणपात्रप्रपञ्चः
9. अत्रिसंहिता 1-41
10. हितोपदेशः (सन्धि) - 138
11. म.स्मृ. 6-92
12. भगवद्गीता 3-55
13. यजुर्वेदः (रुद्राध्यायः)
14. भगवद्गीता 2-22
15. फ्रेंट्सन्
16. M.K. Gandhi
17. स्वरचितः